॥ श्रीः ॥

चौखम्बा सुरभारती ग्रन्थमाला
२२२

श्रीवाचस्पतिमिश्रकृता

# साङ्ख्यतत्त्वकौमुदी

'कृष्णा'-संस्कृत-हिन्दीव्याख्याद्वयोपेता

व्याख्याकार
पं० श्रीज्वालाप्रसाद गौड़
भूतपूर्व प्रधानाचार्य
सन्यासि संस्कृत महाविद्यालय, वाराणसी

भूमिका लेखक
पं० श्रीवसन्तत्र्यम्बक शेवडे

चौखम्बा सुरभारती प्रकाशन
वाराणसी

॥ श्रीः ॥

श्रीवाचस्पतिमिश्रकृता

# सांख्यतत्त्वकौमुदी

## 'कृष्णा'-संस्कृत-हिन्दीव्याख्याद्वयोपेता

अजामेकां लोहितशुक्लकृष्णां
बह्वीः प्रजाः सृजमानां नमामः।
अजा ये तां जुषमाणां भजन्ते
जहत्येनां भुक्तभोगां नुमस्तान् ॥ १ ॥

---

* कृष्णा-टीका *

**यत्कारुण्यकणस्पर्शान्मूको वाचस्पतीं यति।**
**ब्रह्मोपेन्द्रशिवैर्वन्द्यां नौमि तां वागधीश्वरीम् ॥**
**जननीजनकौ नत्वा ध्यायं ध्यायं गुरोः पदम्।**
**ज्वालाप्रसादगौडेन 'कृष्णा' टीका वितन्यते ॥**

**प्रकृतिपुरुषयोः कृते नमस्कारात्मकं मङ्गलम्**

इह खलु निखिलदर्शनाऽसाधारणशेमुषीकः श्रीवाचस्पतिमिश्र आचार्यप्रवरः सांख्यसिद्धान्तमाविष्कुर्वन् प्रारीप्सितग्रन्थस्य निर्विघ्नपरिसमाप्त्यर्थं शिष्यशिक्षायै प्रकृति पुरुषांश्च प्रणमति—**'अजामेकाम्'** इत्यादिना। एकाम् = सजातीयद्वितीयरहिताम्। लोहितशुक्लकृष्णाम् = रजःसत्त्वतमोगुणात्मिकाम्। बह्वीः = महदहङ्कारमनो-ज्ञानेन्द्रिय-कर्मेन्द्रिय-तन्मात्र-स्थूलभूत-चराऽचरादिस्वरूपाः। प्रजाः = सुख-दुःख-मोहात्मक-महदादयो विकाराः। सृजमानाम् = समुत्पादयन्तीम्, महदादिनानाविधविकारस्वरूपेण परिणामशीलामित्यर्थः। अजाम्=न जायते इत्यजा तां मूलप्रकृतिम्, उत्पत्त्यादिविकार-रहितामित्यर्थः। नमामः, वयमिति शेषः। इत्येवं रूपेण प्रकृतिं प्रणम्य, अनन्तरं लौकिकाऽलौकिकभेदभिन्नान् पुरुषानपि नमस्कुर्मः—**अजा ये तामिति**। ये=

---

हम इस चराचर विश्वरूप बहुत-सी प्रजाओं की सृष्टि ( रचना ) करने वाली, नित्य, एक, रजोगुण, सत्त्वगुण, तमोगुणात्मिका अर्थात् त्रिगुणात्मिका प्रकृति को नमस्कार करते हैं, और उन पुरुषों को भी हम नमस्कार करते हैं, जो पुरुष भी नित्य तथा अनादि हैं; एवं शब्दादि विषय सम्बन्धी उपभोगों को प्रदान करने वाली उस प्रकृति को भजते हैं तथा अन्त में भुक्तभोग इस प्रकृति को अनात्म वस्तु समझकर छोड़ देते हैं ॥ १ ॥

कपिलाय महामुनये मुनये शिष्याय तस्य चासुरये ।
पञ्चशिखाय तथेश्वरकृष्णायैते नमस्यामः ॥ २ ॥

अहम्प्रत्ययविषयतया प्रसिद्धि गताः । अजाः—न जायन्ते=नोत्पद्यन्ते, इत्यजाः= अनादिनो जीवात्मानः, संसारिपुरुषा इत्यर्थः । यद्यपि पारमार्थिकदृष्ट्या पुरुषाः पुष्कर-पलाशवन्निर्लेपोऽसङ्गश्च, भोगादयश्च विकाराः सन्ति चित्तधर्माः । तथापि चिति-चित्तयोः शक्तिशक्तिमतोरिवाऽभेदग्रहात् पुरुषश्चितवृत्तीः स्वस्मिन् आरोप्य 'अहं सुखी' 'अहं दुःखी' 'अहं मूढः' 'अहं कर्ता' 'अहं भोक्ते'त्यादिरूपेणाऽध्यवस्यति पुरुषः, यथा कश्चित् पुरुषो मलिने दर्पणे स्वयं मुखं विलोक्य तदीयं मालिन्यं दर्पणप्रतिविम्बिते मुखे आरोप्य मदीयं मुखं मलीनं जातमित्यादिरूपेण शोचति । एतेन पुरुषस्य भोग औपा-धिक एव न तु वास्तविक इत्येव निश्चीयते । तथा चोक्तमपि—

'गृहीतानिन्द्रियैरर्थानात्मने यः प्रयच्छति ।
अन्तःकरणरूपाय तस्मै विश्वात्मने नमः' ॥ ( वि० पु० )

जुषमाणाम्=सुखादिप्रदानकर्तृत्वेन सेवमानाम् । ताम्=प्रकृतिम्, सुखादिस्वरूप-शब्दादिलक्षणपरिणामेन पौरुषेयभोगं साधयन्तीमित्यर्थः । भजन्ते=अविवेकेन भुञ्जते । भुक्तभोगाम्—भुक्तः=निष्पादितः, भोगः=अनित्यं कृत्यं यया ताम्, समाप्तकृत्या-मित्यर्थः । अत्र भोग इति च मोक्षस्यापि सङ्ग्राहकम् । शब्दादिविषयजन्यसुख-दुःखान्य-तरसाक्षात्कारो भोगः, प्रकृतिपुरुषान्यताख्यातिश्चापवर्गः । एवञ्च निष्पादितपौरुषेय-भोगापवर्गत्वेन समाप्ताधिकारामिति यावत् । एनाम्=प्रकृतिम् । जहति=परित्यजन्ति । तान्=विवेकिनो पुरुषान् । ( अपि ) नुमः=नमस्कुर्मः । वयमिति शेषः ।

अत्रेदं बोध्यम्—तावत्कालपर्यन्तमेव पुरुषः प्रकृतिस्वरूपं परिचयार्थं चेष्टते याव-त्कालं भोगं वाऽपवर्गं वा न निष्पादयति, निष्पादितभोगापवर्गो हि पुरुषः कृतकृत्यः सन् स्वयमेव निवर्तते, तत्रापि पुरुषाणामनन्तत्वाद् यं पुरुषं प्रति कृतकार्या सा भवति तं प्रत्येव निवर्तते नान्यान् प्रति इति तु परमार्थः । सांख्यशास्त्रप्रवर्त्तकानाचार्यानपि प्रण-मति, तत्र च प्रणामसंविधाने पूर्वं श्रुत्युक्ति दर्शयति—

'यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः' ॥ ( सुबालोपनिषत् )

इति श्रुतिमाश्रित्य गुरुवन्दनं करोति—'**कपिलाय**' इत्यादिना । 'नमस्याम' इत्यत्र 'वयम्' इति कर्तृपदमध्याहार्यम् । एते ( वयम् ) महामुनये कपिलाय, तस्य शिष्याय आसुरये च मुनये, ( एवम् ) पञ्चशिखाय तथा ईश्वरकृष्णाय नमस्यामः ।

एते=अहं वाचस्पतिमिश्रः, मदीयाश्चान्तेवासिन एते सर्वे वयमित्यर्थः । महामुनये= अप्रतिहताऽनौपदेशिकज्ञानावच्छिनाय । 'महामुनये' इत्यत्र महत्त्वम् अप्रतिहताऽनौप-देशिकत्वम्, मुनित्वञ्च ज्ञानवत्त्वम्, परस्परमन्वयबलात् प्रागुक्तविशिष्टार्थलाभः । कपि-

---

इसके पश्चात् हम महामुनि कपिल एवं उनके शिष्य मुनि आसुरि तथा आसुरि के शिष्य पञ्चशिख और ईश्वरकृष्ण इनको भी हम नमस्कार करते हैं ॥ २ ॥